॥ श्री गुरुभ्यो नमः हरिः ॐ ॥

# अथ नवरात्रि दुर्गा पूजा

*प्रार्थना*

वक्रतुण्ड महाकाय कोटिसुर्य समप्रभ ।
निर्विघ्नं कुरुमे देव सर्व कार्येषु सर्वदा ॥
शुक्लांभरधरं विष्णुं शशिवर्णं चतुर्भुजं ।
प्रसन्न वदनं ध्यायेत् सर्वविघ्नोप शान्तये ॥

*घण्टानाद*

आगमार्थं तु देवानां गमनार्थं तु रक्षसां ।
कुर्वे घण्टारवं तत्र देवताह्वावान लाञ्चनं ॥

*महागणपति पूजा*

ॐ सुमुखाय नमः । ॐ एकदन्ताय नमः । ॐ कपिलाय नमः ।
ॐ गजकर्णकाय नमः । ॐ लंबोदराय नमः । ॐ विकटाय नमः ।
ॐ विघ्नराजाय नमः । ॐ गणाध्यक्षाय नमः । ॐ धूमकेतवे नमः ।
ॐ गणाधिपाय नमः । ॐ भालचन्द्राय नमः । ॐ गजाननाय नमः ।
ॐ श्री महागणपतये नमः - नाम पूजां समर्पयामि ।
ॐ श्री महागणपतये नमः - पुष्पाणि समर्पयामि ।
ॐ श्री महागणपतये नमः - धूपमाघ्रापयामि ।
ॐ श्री महागणपतये नमः - एकार्ति दीपं दर्शयामि ।
ॐ श्री महागणपतये नमः - नैवेद्यं समर्पयामि ।
ॐ श्री महागणपतये नमः - मङ्गल नीराजनं समर्पयामि ।

*संकल्पम्*

प्रणवस्य परब्रह्म ऋषिः परमात्मा देवता दैवी गायत्री छन्दः प्राणायामे विनियोगः
ॐ भूः ॐ भुवः ॐ सुवः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं
ॐ तत्सवितुर्व्वरेण्यं भर्गो दवस्य धीमहि । धियो यो नः प्रचोदयात् ॥
ॐ आपो ज्योतिरसो अमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

ममोपात्त दुरित क्षयद्वारा अस्माकं सह कुटुम्बानां क्षेम स्थैर्य वीर्य विजय विद्या विनय वैराग्य आयुः आरोग्य ऐश्वर्य अभिवृध्यर्थं धर्मार्थ काममोक्ष चतुर्विध फल पुरुषार्थ सिध्यर्थं सत्सन्तान सौभाग्य शुभफला अवाप्यर्थं आध्यात्मिकादि भौमान्तरिक्ष दिव्य महोत्पात दुर्निमित्त कृत दुष्टशमनार्थं महाकाळी महासरस्वती महालक्ष्मी रूपधरं दुर्गा परमेश्वरी देवतामुद्दिश्य दुर्गा परमेश्वरी देवता प्रीत्यर्थं शरन्नवरात्री प्रयुक्तं नवम्यां षोडशोपचार पूजा आराधनं करिष्ये |

*ध्यानं*

सर्वदेव मयंवारी सर्व तीर्थ समन्विते |
इदमघं समागच्छ तिष्टद्देव गणैस्सह ||
दुर्गादेवी समागच्छ सानिध्यं इहकल्पय |
पूजबलिं गृहानत्वं अष्टाभिस्सह शक्तिभिः ||
श्री दुर्गायै नमः ध्यानं समर्पयामि

*आवाहनं*

महाकाळी महालक्ष्मी महासरस्वतीशवरी |
देवतात्मका चण्डिका महात्रिपुर सुन्दरी ||
श्री दुर्गायै नमः आवाहनं समर्पयामि

*आसनं*

षानाहं प्रेतासनसमासिने श्वेतपद्मासनस्थिते |
आसनं कल्पयामीते चामुण्डेचरिविक्रमे ||
श्री दुर्गायै नमः आसनं समर्पयामि

*पाद्यं*

सुरासुर महामौळी मालामाणिक्य कान्तिभिः |
विराजितपदद्वन्द्वे पाद्यं देवी ददाम्यहं ||
श्री दुर्गायै नमः पादयोः पाद्यं समर्पयामि

*अर्घ्यं*

अनर्घसत्य संपूर्णे प्रसन्नेनर्घवाञ्छिते |
अर्घ्यं दास्यामि देवेशी महानर्घ वरप्रदे ||
श्री दुर्गायै नमः हस्तयोः अर्घ्यं समर्पयामि

*आचमनियं*

रक्तबीज समुत्पन्न रत्नासन समाश्रिये |
ददाम्याचमनं तुभ्यं भक्तानां भद्रदायिनीं ||
श्री दुर्गायै नमः मुखे आचमनियं समर्पयामि

*स्नानीयं*

पयोदधिघृतोपेतम् शर्करा मधुसंयुतं |
पञ्चामृत स्नानमिदं गृहाण कमलालये ||
श्री दुर्गायै नमः पञ्चामृत स्नानं समर्पयामि
सुवर्ण कलशानीतं गङ्गादि सरिदुद्भवं |
देवी तुभ्यं प्रदास्यामि स्नानं कुरु शिवप्रिये ||
श्री दुर्गायै नमः स्नानीयं समर्पयामि

*वस्त्रं*

पीतांबर धरे देवी पीतांबर सहोदरी |
पीतांबर प्रयच्छामि मिद्युत्पिङ्ग जटाधरे ||
श्री दुर्गायै नमः वस्त्रं समर्पयामि

*गन्धं*

कर्पूरगन्ध सम्मिश्रं कस्तूरी कुङ्कुमान्वितम् |
श्रीगन्धंते प्रदास्यामि कीर्तिम्वृद्धिम् कुरुश्चमे ||
श्री दुर्गायै नमः गन्धं समर्पयामि

*दिवयभूषणनि*

किरीटहार केयूर कङ्कणा भुजभूषणैः |
मुक्तामाणिक्यहारैश्च कटिसंस्थित नूपुरैः ||
श्री दुर्गायै नमः दिव्यभूषणनि आभरणानि समर्पयामि

*आभरणानि*

त्वत्पादपद्म युगळौ प्रणतं क्षेमगमनं |
प्रतिगृह्यतां देवी देहिमां महावरं ||
श्री दुर्गायै नमः हरिद्रा कुंकुम चूर्णं समर्पयामि

*पत्र पुष्पाणि*

दुर्गायै नमः | जैत्रेयै नमः | मङ्गलायै नमः | काल्यै नमः |
भद्र काल्यै नमः | कामारियै नमः | मदनमात्रे नमः |
भद्रायै नमः | अभयप्रदायै नमः | स्वधायै नमः |
महिषघ्ने नमः | सिंहवाहिन्यै नमः | शिवायै नमः |
कौमार्यै नमः | नवदुर्गरूपिण्यै नमः ||
श्री दुर्गायै नमः नानाविध पत्र पुष्पाणि समर्पयामि

*अष्टोतर - देवी अष्टोत्तर*

<< देवी अष्टोत्तर >>
श्री दुर्गायै नमः अष्टोत्तर शत नाम पूजां समर्पयामि |

*धूपम्*

वनस्पति रसैर्दिवैः गन्धाढ्यैः सुमनोहरैः |
कपिलघृत संयुक्तं धूपोयं प्रतिगृह्यतां ||
कालागरुप्रचय गुग्गुलगन्ध धूपैः नानाविधैः सुरभितां त्वां |
श्री दुर्गायै नमः चन्दनाखिल तिक्तागरु कर्पूर धूपमाघ्रापयामि

*दीपम्*

साज्यं त्रिवर्ति संयुक्तं वह्निनाद्योतितं मया |

गृहाण मङ्गलं दीपं त्रैलोक्य तिमिरापहे ||
भक्त्या देवी प्रयच्छामि देव्यै च परमात्मने |
त्राहिमां नरकात् घोरात् दिव्यज्योतिः नमोस्तुते ||
श्री दुर्गायै नमः दीपं दर्शयामि |

*नैवेद्यं*

शर्करा मधु संयुक्तं आज्याद्यैः रसपूरितं |
गृहाण दुर्गा नैवेद्यं महिषासुर मर्दिनि ||
ॐ अमृतमस्तु अमृतोपस्थरणमसी स्वाहा ||
ॐ प्राणाय स्वाहा | ॐ अपानाय स्वाहा | ॐ व्यानाय स्वाहा |
ॐ उदानाय स्वाहा | ॐ समानाय स्वाहा | ॐ ब्रह्मणे स्वाहा ||
श्री दुर्गायै नमः नैवेद्यं समर्पयामि |

*नीराजनं*

वेदाहमेतं पुरुषं महान्तं | आदित्यवर्णं तमसः परस्तात् ||
तमेवं विद्वान अमृत इह भवति | नान्यः पन्था विद्यतेय नाय ||
श्री दुर्गायै नमः कर्पूर नीराजनं समर्पयामि |

*मन्त्रपुष्पं* - **दुर्गाससूक्तं**
श्री दुर्गायै नमः मन्त्रपुष्पं समर्पयामि |

*प्रार्थना*

ईशशक्तिं देवशक्तिं सर्वशक्ति स्वरूपिणीम् |
मनोबुध्ध्यादि शक्तिम् तां श्री दुर्गीम् प्रणमाम्यहम् ||
श्री दुर्गायै नमः मनसोभीष्ठ प्रार्थनान् समर्पयामि |

*प्रदक्षिण नमस्कार*

यानि कानि च पापानि जन्मान्तर कृतानि च |
तानि तानि विनश्यन्ति प्रदक्षिण पदे पदे ||
श्री दुर्गायै नमः प्रदक्षिण नमस्कारान् समर्पयामि |

*प्रायश्चित*

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मनावा प्रकृत्यै स्वभावात्
करोमि यद्यत् सकलं परस्मै श्रीमन्नरायणायेति समर्पयामि |

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते |
पूर्णस्य पूर्णमादाय पूर्णमेव अवशिष्यते ||

ॐ शान्तिः शान्तिः शान्तिः ||

|| हरिः ॐ ||

॥ श्री गुरुभ्यो नमः हरिः ॐ ॥

# *atha navarātri durgā pūjā*

*prārthanā*

**vakratuṇḍa mahākāya koṭisurya samaprabha |**
**nirvighnaṃ kurume deva sarva kāryeṣu sarvadā ||**

**śuklāṃbharadharaṃ viṣṇuṃ śaśivarṇaṃ caturbhujaṃ |**
**prasanna vadanaṃ dhyāyet sarvavighnopa śāntaye ||**

*ghaṇṭānāda*

**āgamārthaṃ tu devānāṃ gamanārthaṃ tu rakṣasāṃ |**
**kurve ghaṇṭāravaṃ tatra devatāhvāvāna lāñcanaṃ ||**

*mahāgaṇapati pūjā*

**oṃ sumukhāya namaḥ | oṃ ekadantāya namaḥ | oṃ kapilāya namaḥ |**
**oṃ gajakarṇakāya namaḥ | oṃ laṃbodarāya namaḥ | oṃ vikaṭāya namaḥ |**
**oṃ vighnarājāya namaḥ | oṃ gaṇādhyakṣāya namaḥ | oṃ dhūmaketave namaḥ |**
**oṃ gaṇādhipāya namaḥ | oṃ bhālacandrāya namaḥ | oṃ gajānanāya namaḥ |**
**oṃ śrī mahāgaṇapataye namaḥ – nāma pūjāṃ samarpayāmi |**
**oṃ śrī mahāgaṇapataye namaḥ – puṣpāṇi samarpayāmi |**
**oṃ śrī mahāgaṇapataye namaḥ – dhūpamāghrāpayāmi |**
**oṃ śrī mahāgaṇapataye namaḥ – ekārti dīpaṃ darśayāmi |**
**oṃ śrī mahāgaṇapataye namaḥ – naivedyaṃ samarpayāmi |**
oṃ śrī mahāgaṇapataye namaḥ – maṅgala nīrājanaṃ samarpayāmi |

*saṃkalpam*

**praṇavasya parabrahma ṛṣiḥ paramātmā devatā daivī gāyatrī chandaḥ prāṇāyāme viniyogaḥ**
**oṃ bhūḥ oṃ bhuvaḥ oṃ suvaḥ oṃ mahaḥ oṃ janaḥ oṃ tapaḥ oṃ satyaṃ**
**oṃ tatsaviturrvareṇyaṃ bhargo davasya dhīmahi | dhiyo yo naḥ pracodayāt ||**

**oṃ āpo jyotiraso amṛtaṃ brahma bhūrbhuvassuvarom ||**

**mamopātta durita kṣayadvārā asmākaṃ saha kuṭumbānāṃ kṣema sthairya vīrya vijaya vidyā vinaya vairāgya āyuḥ ārogya aiśvarya abhivṛdhyarthaṃ dharmārtha kāmamokṣa caturvidha phala puruṣārtha sidhdyarthaṃ satsantāna saubhāgya śubhaphalā avāpyarthaṃ ādhyātmikādi bhaumāntarikṣa divya mahotpāta durnimitta kṛta duṣṭaśamanārthaṃ mahākālī mahāsarasvatī mahālakṣmī rūpadharaṃ durgā parameśvarī devatāmuddiśya durgā parameśvarī devatā prītyarthaṃ śarannavarātrī prayuktaṃ navamyāṃ ṣoḍaśopacāra pūjā ārādhanaṃ kariṣye |**

*dhyānaṃ*
**sarvadeva mayaṃvārī sarva tīrtha samanvite |**
**idamaghaṃ samāgaccha tiṣṭaddeva gaṇaissaha ||**

**durgādevī samāgaccha sānidhyaṃ ihakalpaya |**
**pūjabaliṃ gṛhānatvaṃ aṣṭābhissaha śaktibhiḥ ||**

śrī durgāyai namaḥ dhyānaṃ samarpayāmi

*āvāhanaṃ*
**mahākālī mahālakṣmī mahāsarasvatīśavarī |**
**devatātmakā caṇḍikā mahātripura sundarī ||**

śrī durgāyai namaḥ āvāhanaṃ samarpayāmi

*āsanaṃ*
**ṣānāhaṃ pretāsanasamāsine śvetapadmāsanasthite |**
**āsanaṃ kalpayāmīte cāmuṇḍecarivikrame ||**

śrī durgāyai namaḥ āsanaṃ samarpayāmi

*pādyaṃ*
**surāsura mahāmaulī mālāmāṇikya kāntibhiḥ |**
**virājitapadadvandve pādyaṃ devī dadāmyahaṃ ||**

śrī durgāyai namaḥ pādayoḥ pādyaṃ samarpayāmi

*arghyaṃ*
**anarghasatya saṃpūrṇe prasannenarghavāñchite |**
**arghyaṃ dāsyāmi deveśī mahānargha varaprade ||**

śrī durgāyai namaḥ hastayoḥ arghyaṃ samarpayāmi

*ācamaniyaṃ*
**raktabīja samutpanna ratnāsana samāśriye |**
**dadāmyācamanaṃ tubhyaṃ bhaktānāṃ bhadradāyinīṃ ||**

śrī durgāyai namaḥ mukhe ācamaniyaṃ samarpayāmi

*pañcāmṛta snānaṃ*
**payodadhighṛtopetam śarkarā madhusaṃyutaṃ |**
**pañcāmṛta snānamidaṃ gṛhāṇa kamalālaye ||**

śrī durgāyai namaḥ pañcāmṛta snānaṃ samarpayāmi

*snānīyaṃ*
**suvarṇa kalaśānītaṃ gaṅgādi saridudbhavaṃ |**
**devī tubhyaṃ pradāsyāmi snānaṃ kuru śivapriye ||**

śrī durgāyai namaḥ snānīyaṃ samarpayāmi

*vastraṃ*
**pītāṃbara dhare devī pītāṃbara sahodarī |**
**pītāṃbara prayacchāmi midyutpiṅga jaṭādhare ||**

śrī durgāyai namaḥ vastraṃ samarpayāmi

*gandhaṃ*
**karpūragandha sammiśraṃ kastūrī kuṅkumānvitam |**
**śrīgandhaṃte pradāsyāmi kīrtimvṛddhim kuruśvame ||**

śrī durgāyai namaḥ gandhaṃ samarpayāmi

*divayabhūṣaṇani*
**kirīṭahāra keyūra kaṅkaṇā bhujabhūṣaṇaiḥ |**
**muktāmāṇikyahāraiśca kaṭisaṃsthita nūpuraiḥ ||**

śrī durgāyai namaḥ divyabhūṣaṇani ābharaṇāni samarpayāmi

*ābharaṇāni*
**tvatpādapadma yugalau praṇataṃ kṣemagamanaṃ |**
**pratigṛhyatāṃ devī dehimāṃ mahāvaraṃ ||**

śrī durgāyai namaḥ haridrā kuṃkuma cūrṇaṃ samarpayāmi

*patra puṣpāṇi*
**durgāyai namaḥ | jaitreyai namaḥ | maṅgalāyai namaḥ | kālyai namaḥ |**
**bhadra kālyai namaḥ | kāmāriyai namaḥ | madanamātre namaḥ |**
**bhadrāyai namaḥ | abhayapradāyai namaḥ | svadhāyai namaḥ |**
**mahiṣaghne namaḥ | siṃhavāhinyai namaḥ | śivāyai namaḥ |**
**kaumāryai namaḥ | navadurgarūpiṇyai namaḥ ||**

śrī durgāyai namaḥ nānāvidha patra puṣpāṇi samarpayāmi

*aṣṭottara - devī aṣṭottara*
**<< devī aṣṭottara >>**
śrī durgāyai namaḥ aṣṭottara śata nāma pūjāṃ samarpayāmi |

*dhūpam*
**vanaspati rasairdivaiḥ gandhāḍhyaiḥ sumanoharaiḥ |**
**kapilaghṛta saṃyuktaṃ dhūpoyaṃ pratigṛhyatāṃ ||**

**kālāgarupracaya guggulagandha dhūpaiḥ nānāvidhaiḥ surabhitāṃ tvāṃ |**

śrī durgāyai namaḥ candanākhila tiktāgaru karpūra dhūpamāghrāpayāmi

*dīpam*
**sājyaṃ trivarti saṃyuktaṃ vahninādyotitaṃ mayā |**
**gṛhāṇa maṅgalaṃ dīpaṃ trailokya timirāpahe ||**

**bhaktyā devī prayacchāmi devyai ca paramātmane |**
**trāhimāṃ narakāt ghorāt divyajyotiḥ namostute ||**

śrī durgāyai namaḥ dīpaṃ darśayāmi |

*naivedyaṃ*
**śarkarā madhu saṃyuktaṃ ājyādyaiḥ rasapūritaṃ |**
**gṛhāṇa durgā naivedyaṃ mahiṣāsura mardini ||**

**oṃ amṛtamastu amṛtopastharaṇamasī svāhā ||**
**oṃ prāṇāya svāhā | oṃ apānāya svāhā | oṃ vyānāya svāhā |**
**oṃ udānāya svāhā | oṃ samānāya svāhā | oṃ brahmaṇe svāhā ||**

śrī durgāyai namaḥ naivedyaṃ samarpayāmi |

*nīrājanaṃ*
**vedāhametaṃ puruṣaṃ mahāntaṃ | ādityavarṇaṃ tamasaḥ parastāt ||**
**tamevaṃ vidvāna amṛta iha bhavati | nānyaḥ panthā vidyateya nāya ||**

śrī durgāyai namaḥ karpūra nīrājanaṃ samarpayāmi |

*mantrapuṣpaṃ*

**<< durgāsasūktaṃ >>**
śrī durgāyai namaḥ mantrapuṣpaṃ samarpayāmi |

*prārthanā*
**īśaśaktiṃ devaśaktiṃ sarvaśakti svarūpiṇīm |**
**manobudhdhyādi śaktim tāṃ śrī durgīm praṇamāmyaham ||**

śrī durgāyai namaḥ manasobhīṣṭha prārthanān samarpayāmi |

*pradakṣiṇa namaskāra*
**yāni kāni ca pāpāni janmāntara kṛtāni ca |**
**tāni tāni vinaśyanti pradakṣiṇa pade pade ||**

śrī durgāyai namaḥ pradakṣiṇa namaskārān samarpayāmi |

*prāyaścitta*
**kāyena vācā manasendriyairvā buddhyātmanāvā prakṛtyai svabhāvāt**
**karomi yadyat sakalaṃ parasmai śrīmannarāyaṇāyeti samarpayāmi |**

**oṃ pūrṇamadaḥ pūrṇamidaṃ pūrṇāt pūrṇamudacyate |**
**pūrṇasya pūrṇamādāya pūrṇameva avaśiṣyate ||**

**oṃ śāntiḥ śāntiḥ śāntiḥ ||**

*|| hariḥ oṃ ||*